CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 443

Title Āpastambīya pāvamānī-
mukha

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 443 Subject : Vedic lit.

Title : Āpastambīya pāvamānānuvāka

Author : — Scribe :

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. :

Size : 6.6" by 4.1" Extent : 2 foll.

Language : Sanskrit Script : Devanāgarī

Remarks : —

श्रीगणेशाय नमः ॥ अथ पवमानानुवाकाः लिख्यते ॥
ॐ पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पो
ता स पुनातु मा । पुनंतु मा देवजनाः । पुनंतु मनवो धि
या । पुनंतु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रे
ण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूं
रनु । यत्ते पवित्रमर्चिषि । अग्ने विततमंतरा । ब्रह्म तेन
पुनीमहे । उभाभ्यां देव सवितः । पवित्रेण सवेन च ।
इदं ब्रह्म पुनीमहे । वैश्वदेवी पुनती देव्यागात् । य
स्यै बह्वीस्तनुवो वीतपृष्ठाः । तया मदंतः सधमाद्ये
षु । वयं स्याम पतयो रयीणां । वैश्वानरो र

१ द्भिर्मा पुनातु ॥ वातः प्राणेनेषिरो मयोभूः । द्या
वापृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनी
तां । बृहद्भिः सवितुस्तृभिः । वर्षिष्ठैर्देवमन्मभिः । अ
ग्ने दक्षैः पुनाहि मा । येन देवा अपुनत । येना पो दिव्यं क
शः । तेन दिव्येन ब्रह्मणा । इदं ब्रह्म पुनीमहे । यः पावमा
नीरध्येति । ऋषिभिः संभृतं रसं । सर्वं स पूतमश्ना
ति । स्वदितं मातरिश्वना । पावमानीर्यो अध्येति । ऋ
षिभिः संभृतं रसं । तस्मै सरस्वती दुहे । क्षीरं सर्पि
र्मधूदकं । पावमानीस्स्वस्त्ययनीः । सुदुघा हि पयस्वतीः ।
ऋषिभिः संभृतो रसः । ब्राह्मणेष्वमृतं हितं ॥ १

पावमानीर्दिशंतु नः ॥ इमं लोकमथो अमुं ॥ कामान्त्समर्द्ध
यंतु नः ॥ देवीर्देवैः समाभृताः ॥ पावमानीः स्वस्त्ययनीः ॥
सुदुघा हि घृतश्चुतः ॥ ऋषिभिः संभृतो रसः ॥ ब्राह्मणेष्व
मृतं हितं ॥ येन देवाः पवित्रेण ॥ आत्मानं पुनते सदा ॥ तेन
सहस्रधारेण ॥ पावमान्यः पुनंतु मा ॥ प्राजापत्यं पवित्रं ॥
शतोद्यामं हिरण्मयं ॥ तेन ब्रह्मविदो वयं ॥ पूतं ब्रह्म पुनीम
हे ॥ इंद्रः सुनीती सह मा पुनातु ॥ सोमः स्वस्त्या वरुणः समी
च्या ॥ यमो राजा प्रमृणाभिः पुनातु मा ॥ जातवेदा मोर्जयंत्या
पुनातु ॥ १ ॥ इति पावमानानुवाक आपस्तंबीयः समाप्तः ॥

२

३

7.